खमासमण पूर्वक 'इरियावहियं० तस्स उत्तरी० अन्नत्थ०' कह कर एक लोगस्स का काउस्सग्ग करके प्रकट लोगस्स कहे । पीछे 'इच्छामि० इच्छा० पोसह पारूं ? यथाशक्ति' । 'इच्छामि० इच्छा० पोसह पारेमि ? तहत्ति' कह कर दाहिना हाथ नीचे रखकर तीन नवकार गिने । पीछे खमासमण देकर मुँहपत्ति पडिलेवे । पीछे 'इच्छामि० इच्छा० सामायिक पारुं ? यथाशक्ति,' फिर इच्छामि० इच्छ० सामायिक पारेमि ? तहत्ति' कहकर खमासमण पूर्वक आधा अंग नमा कर तीन नवकार गिने । पीछे घुटने टेक कर शिर नमा कर दाहिना हाथ नीचे रखकर—

भयवं ! दसण्णभद्दो, सुदंसणो थूलभद्द वइरो य । सफलीकयगिहचाया, साहू एवं विहा हुंति ॥ १ ॥ साहूण वंदणेण, नासइ पावं असंकिया भावा । फासुयदाणे निज्जर, अभिग्गहो

नाणमाईणं ॥ २ ॥ छउमत्थो मूढमणो, कित्तियमित्तं पि संभरइ जीवो । जं च न संभरामि अहं, मिच्छा मि दुक्कडं तस्स ॥ ३ ॥ जं जं मणेण चिंतिय - मसुहं वायाइ भासियं किंचि । असुहं काएण कयं, मिच्छा मि दुक्कडं तस्स ॥ ४ ॥ सामाइय - पोसह- संठियस्स, जीवस्स जाइ जो कालो । सो सफलो बोधव्वो, सेसो संसारफलहेऊ ॥ ५ ॥

सामायिक विधि से लिया, विधि से किया, विधि से करते हुए अविधि आशातना लगी हो, दश मनका, दश वचन का, बारह कायाका, इन बत्तीस दूषणों में जो कोई दूषण लगा हो, उन सबका मन वचन काया करके मिच्छा मि दुक्कडं ।

इस प्रकार पोसह पार कर पोसह के उपगरण लेकर, देव- दर्शन करके घर आकर अतिथिसंविभाग व्रत आचरण करता हुआ आहार करे ।

इति आठ पहरी पौषध विधि ॥

दिन संबंधी चउपहरी-पौसह-विधि ।

आगे जो आठ प्रहर पोषध लेनेकी विधि लिखी है, उसी प्रकार चार प्रहर पोषध लेनेकी विधि है, किन्तु पौसह दंडक उच्चरते समय 'जाव अहोरत्तिं पज्जुवासामि' पाठ है, उस जगह 'जाव दिवसं पज्जुवासामि' ऐसा पाठ बोलना चाहिए । इसके बाद पूर्ववत् सामायिक लेवे । यदि प्रतिक्रमण गुरुके साथ न किया हो तो गुरुके पास आकरके पौषध

और सामायिक की पूर्ववत् सब विधि करे। पीछे आलोयण खमासमणादि निमित्ते मुँहपत्ति पडिलेहे और दो वांदना देवे। बादमें 'इच्छा० सं० भ० राइअं आलोउं ? इच्छं, आलोएमि जो मे राइओ अइआरो०' इत्यादि पाठ से राइ आलोवे। फिर एक खमासमण देकर 'इच्छाका० सं० भ० अब्भुट्ठिओमि अब्भिंतर राइअं खामेउं ? इच्छं खामेमि राइअं जं किंचि'० इत्यादि पाठ से राई खामे, अर्थात् विधि-पूर्वक गुरुवंदन करे। पश्चात् गुरु के समक्ष उपवास आदिका पचक्खाण करे। बाद दो खमासमण से बहुवेल संदिसावे। पडिलेहन पहले किया हो तो भी आदेश लेना—'इच्छामि० इच्छा० पडिलेहन संदिसाहुं, ? इच्छं' इच्छामि० इच्छा० पडिलेहन करूं ? इच्छं' कह कर मुँहपत्ति पडिलेहना। पीछे फिर 'इच्छामि० इच्छा० अंग-पडिलेहन संदिसाहुं ? इच्छं' इच्छामि० इच्छा० अंगपडिलेहन करूं ? इच्छं' कहकर मुँहपत्ति पडिलेहे। पीछे 'इच्छामि० इच्छाकारेण संदिसह भगवन् पमाय करी पडिलेहण पडिलेहावोजी ? इच्छं'। बाद 'इच्छामि० इच्छा० उपधि मुँहपत्ति पडिलेहुं ? इच्छं' कह कर कोई वस्त्र विना पडिलेहण किये रखा हो तो पडिलेहे, नहीं तो फिर सिर्फ आसन पडिलेहे। बाद दो खमासमण पूर्वक सज्झाय संदिसाहुं और सज्झाय करूं कह कर उपदेशमालाकी सज्झाय कहे। और पीछले प्रहर पचक्खाण करने के बाद दो खमासमण पूर्वक उपधि-पडिलेहन संदिसाहुं ? और उपधि-पडिलेहन करूं ?

ऐसा कहकर पडिलेहन करे, परंतु थंडिला पद न कहे और थंडिला पडिलेहे भी नहीं । बाकी सब विधि आठ प्रहर पौषध-विधि की तरह समझना ॥ इति ॥

रात्रि संबंधी चउपहरी पोसह - विधि ।

जिसने दिनका चउपुहरी पोसह लिया हो, उसे यदि रात्रि पोसह का भाव हुआ हो तो वह संध्या का पडिलेहन और पच्चक्खाण करनेके बाद, दो खमासमण पूर्वक पोसह मुँहपत्ति पडिलेहन करे, पश्चात् दो खमासमणपूर्वक पोसह का आदेश मांग कर, तीन नवकार गिन कर तीन बार पोसह दंडक उच्चरे, इसमें 'जाव अहोरत्तं पज्जुवासामि' पाठ की जगह 'जाव रत्तिं पज्जुवासामि' ऐसा पाठ उच्चरे । इसके बाद सामायिक मुँहपत्ति पडिहेलन कर जो पहिले विधि लिखी है उसी तरह सब विधि करे और कारणविशेष दिनका पौषध न कर सके और रात्रिका पौषध लेने की इच्छा हुई हो तो, पहले सब उपगरणका पडिलेहन कर इरियावहियं० पडिक्कमे । पीछे, चउविहार पच्चक्खाण करके दो खमासमणपूर्वक पोसह-मुँहपत्ति पडिलेहे । पश्चात् दो खमासमणपूर्वक पोसह का आदेश मांग कर तीन नवकार गिन कर तीनबार पोसह-दंडक उच्चरे । इसमें संध्यासमय हो तो 'जाव रत्तिं पज्जुवासामि' ऐसा पाठ बोले । इसके बाद सामायिक मुँहपत्ति पडिलेहन कर जो पहले विधि लिखी है उसी तरह सब विधि करे । अंतमें पडिलेहन

का आदेश मांगने के बाद स्थानक शून्यता मिटाने के लिये सिर्फ एक आसन पडिलेहे, परन्तु पहले पडिलेहन न किया हो तो सब उपधि पडिलेहे। और उचार प्रस्रवण के चौवीस थंडिलों की भी पडिलेहन करे, बाकी सारी विधि पहलेकी तरह समझना ॥इति॥

देसावगासिक लेनेकी और पारने की विधि।

देसावगासिक लेने की विधि पोसह लेनेकी विधि के अनुसार है, परन्तु पोसह लेनेके आदेश में देसावगासिक का आदेश लेना चाहिये, जैसे—"देसावगासिक मुँहपत्ति पडिलेहुं ? देसावगासिक संदिस्साहुं ? देसावगासिक ठाऊं ? देसावगासिक दंडक उच्चरावोजी ?" इस प्रकार खमासमणपूर्वक आदेश मांग कर देसावगासिक का पच्चक्खाण तीन बार उच्चरे।

अथ देसावगासिकपाठः।

अहण्णं भंते ! तुम्हाणं समीवे देसावगासियं पच्चक्खामि। दव्व ओ, खित्तओ, कालओ, भावओ,। दव्वओ णं देसावगासियं, खित्तओणं इत्थ वा, अन्नत्थ वा, कालओ णं जाव धारणा, भावओ णं जाव गहेणं न गहेज्जामि, छलेणं न छलेज्जामि, अन्नेण केण वि रोगायंकेण वा एस मे परिणामो न परिवडइ ताव अभिग्गहो, अण्णत्थणाभोगेणं, सहसागारेणं, महत्तरागारेणं सव्व-समाहि-वत्तियागारेणं, वोसिरइ।

इस प्रकार देसावगासिकका पच्चक्खाण तीन बार उच्चरे । और इसमें बहुवेल का आदेश लेवे नहीं । देसावगासिक जघन्य से तीन सामायिक और उत्कृष्ट से १५ सामायिक का होता है । देसावगासिक पारने की विधि पोसह पारने की विधिके अनुसार समझना; जैसे मुँहपत्ति पडिलेहन कर "देसावगासिक पारूं ! पारेमि" इत्यादि दो खमासमण पूर्वक आदेश मांग कर पारने का सूत्र "भयवं ! दसण्णभद्दो०" की चौथी गाथामें "सामाइय पोसहसंठियस्स" की जगह 'सामाइय देसावगासियं संठियस्स' इत्यादि पाठ कहे ॥ इति ॥

॥ अथ सप्त स्मरणानि ॥

(१) प्रथमं बृहदजितशान्तिस्तवनं स्मरणम् ।

अजिअं जिअसव्वभयं, संतिं च पसंतसव्वगयपावं । जय-गुरु संतिगुणकरे, दो वि जिणवरे पणिवयामि ॥ १ ॥ (गाहा) ॥ ववगयमंगुल भावे, ते हं विउलतवनिम्मलसहावे । निरुवममहप्पभावे, थोसामि सुदिट्ठसब्भावे ॥ २ (गाहा) ॥ सव्वदुक्खप्पसंतीणं, सव्वपावप्पसंतिणं । सया अजिअसंतीणं, नमो अजिअसंतिणं ॥ ३ ॥ (सिलोगो) ॥ अजिअजिण ! सुह-प्पवत्तणं, तव पुरिसुत्तम ! नामकित्तणं । तह य धिइ-मइ-प्पव-त्तणं, तव य जिणुत्तम ! संति ! कित्तणं ॥ ४ ॥ (मागहिआ) ॥

किरिया-विहिसंचिअकम्मकिलेसविमुक्खयरं, अजिअं निचिअं च गुणेहिं महामुणि-सिद्धि-गयं। अजिअस्स य संति-महा-मुणिणो वि अ संतिकरं, सययं मम निव्वुइ-कारणयं च नमंसणयं ॥ ५ ॥ (आलिंगणयं) ॥ पुरिसा ! जइ दुक्ख-वारणं, जइ अ विमग्गह सुक्ख-कारणं। अजिअं संतिं च भावओ, अभयकरे सरणं पवज्जहा ॥ ६ ॥ (मागहिआ) ॥ अरइ-रइ-तिमिर-विरहिअमुवरयजर-मरणं, सुर असुर-गरुल, भुयगवइ-पयय-पणिवइअं। अजिअमहमवि अ सुनय-नय-निउणमभयकरं, सरणमुवसरिअ भुवि-दिविज-महिअं सयय-मुवणमे ॥ ७ ॥ (संगययं) ॥ तं च जिणुत्तम-मुत्तम-नित्तम-सत्तधरं, अज्जव-मद्दव-खंति-विमुत्तिसमाहि-निहिं । संतिकरं पणमामि दमुत्तमतित्थयरं, संति-मुणी मम संति-समाहि-वरं दिसउ ॥८॥ (सोवाणयं) ॥ सावत्थि-पुव्वपत्थिवं च वर-हत्थिमत्थय-पसत्थ-वित्थिन्नसंथिअं, थिर-सरिच्छ-वच्छं मयगल-लीलायमाणवर-गंध-हत्थि-पत्थाण-पत्थियं संथ-वारिहं । हत्थि-हत्थ-बाहुं धंत-कणग-रुअग-निरुवहय-पिंजरं, पवर-लक्खणोवचिअसोम-चारु-रूवं, सुइ-सुह-मणाभिराम-परमरमणिज्ज-वरदेव-दुंदुहि-निनाय-महुरयर-सुह-गिरं ॥ ९ ॥ (वेड्ढओ) ॥ अजिअं जिआरि-गणं, जिअ-सव्व-भयं भवोह-रिउं। पणमामि अहं पयओ, पावं पसमेउ मे भयवं ! ॥ १० ॥

(रासालुद्धओ) ॥ कुरु-जणवय-हत्थिणाउर-नरीसरो पढमं तओ महा-चक्कवट्टि-भोए महप्पभावो, जो बावत्तरि-पुर-वर सहस्स वरनगर निगम-जणवय-वई, बत्तीसा-राय-वर - सहस्साणुयाय - मग्गो । चउदसवर - रयण - नव - महानिहि-चउसट्ठि - सहस्स - पवर - जुवईण सुंदर-वई, चुलसी - हय गय-रह - सयसहस्स - सामी, छन्नवइ - गाम -कोडिसामी आसि जो भारहंमि भयवं ! ॥ ११ ॥ (वेड्ढओ) ॥ तं संतिं संतिकरं, संतिण्णं सव्वभया । संतिं थुणामि जिणं, संतिं विहेउ मे भयवं ! ॥ ११ ॥ (रासानंदियं) ॥ इक्खाग ! विदेह - नरीसर ! नर-वसहा ! मुणि-वसहा ! नव - सारयससि - सकलाणण ! विगय-तमा ! विहुअ - रया ! अजिउत्तम ! तेअगुणेहिं महा-मुणि ! अमिय - बला ? विउल - कुला ! पणमामि ते भव-भय - मूरण ! जग - सरणा ! मम - सरणं ॥ १३ ॥ (चित्त-लेहा) ॥ देव - दाणविंद - चंद - सूर - वंद ! हट्ठ - तुट्ठ - जिट्ठ-परम, लट्ठ - रूव ! धंत - रूप्प पट्ट - सेअ सुद्ध - निद्ध - धवल, दंत-पंति ! संति ! सत्ति - कित्ति - मुत्ति जुत्ति - गुत्ति - पवर !, दित्त-तेअ ! वंदधेअ सव्वलोअ - भाविअप्पभाव - णेअ ! पइस मे समाहिं ॥ १४ ॥ (नारायओ) ॥ विमल - ससि - कलाइरेअ-सोमं, वितिमिर - सूर - कराइरे - अतेअं । तिअसवइगणाइरेअ रूवं, धरणिधर - प्पवरा - इरेअ - सारं ॥ १५ ॥ (कुसुमलया) ॥ सत्ते अ सया अजिअं, सारीरे अ बले अजिअं । तव संजमे अ

अजिअं, एस थुणामि जिणं अजिअं ॥ १६ ॥ (भुअगपरिरंगिअं) सोमगुणेहिं पावइ न तं नवसरयससी, तेअ-गुणेहिं पावइ न तं नवसरयरवी । रूवगुणेहिं पावइ न तं तिअसगणवई, सारगुणेहिं पावइ न तं धरणि-धर-वई ॥ १७ ॥ (खिज्जिअयं) ॥ तित्थ-वर-पवत्तयं तमरयरहिअं, धीर-जण-थुअच्चिअं चुअकलि-कलुसं । संति-सुह-प्पवत्तयं ति-गरण-पयओ, संतिमहं महामुणिं सरणमुवणमे ॥ १८ ॥ (ललिअयं) ॥ विणओणय-सिरि-रइअंजलि-रिसि-गण-संथुअं थिमिअं, विबुहाहिव-धणवइ-नरवइ-थुअ-महिअच्चिअं बहुसो । अइरुग्गय-सरय-दिवायर समहिअ-सप्पभं तवसा, गयणंगण-वियरण-समुइअचारणवंदिअं सिरसा ॥ १९ ॥ (किसलयमाला) ॥ असुर-गरुल-परिवंदिअं, किन्नरोरगणमंसिअं । देव-कोडि-सय-संथुअं, समणसंघपरिवंदिअं ॥ २० ॥ (सुमुहं) ॥ अभयं अणहं, अरयं अरुयं । अजिअं अजिअं, पयओ पणमे ॥ २१ ॥ (विज्जुविलसिअं) ॥ आगया वरविमाण-दिव्व-कणग-रह-तुरय-पहकर-सएहिं-हुलिअं । ससंभमोअरण-खुभिअ-लुलिय चल-कुण्डलंगय-तिरीड-सोहंत-मउलि-माला ॥ २२ ॥ (वेड्ढओ) ॥ जं सुर-संघा सासुर-संघा, वेर-विउत्ता, भत्ति-सुजुत्ता, आयर-भूसिअ-संभम-पिंडिअ-सुट्ठु-सुविम्हिय-सव्व-बलोघा । उत्तम-कंचण-रयण-परूविअ-भासुर-भूसण-भासुरिअंगा, गाय-समोणयभत्ति-वसागय-पंजलि-पेसिय-सीसपणामा ॥ २३ ॥ (रय-

णमाला) ॥ वंदिऊण थोऊण तो जिणं, तिगुणमेव य पुणो, पयाहिणं । पणमिऊण य जिणं सुरासुरा, पमुइआ सभवणाइं तो गया ॥ २४ ॥ (खित्तयं) ॥ तं महामुणि महंपि पंजलि, राग - दोस - भय - मोह - वज्जिअं । देव - दाणव - नरिंद-वंदिअं, संति मुत्तमं - महातवं नमे ॥ २५ ॥ (खित्तयं) ॥ अंबरंतर-वियारणिआहिं, ललिअ-हंस - वहूगामिणिआहिं । पीण - सोणि-थण - सालिणिआहिं, सकल - कमल - दल-लोअणिआहिं ॥२६॥ (दीवयं) ॥ पीण - निरंतर-थण भर - विणमिअ-गाय-लयाहिं, मणि - कंचण - पसि-ढिल - मेहल-सोहिअ - सोणि - तडाहिं । वर-खिंखिणि - नेउर - सतिलय-वलय - विभूसणिआहिं, रइकर - चउर-मणोहर - सुंदर - दंसणिआहिं ॥ २७ ॥ (चित्तक्खरा) ॥ देव-सुंदरीहिं पाय-वंदिआहिं, वंदिआ य जस्स ते सुविक्कमा कमा, अप्पणो निडालएहिं मंडणोड्डणपगारएहिं, केहिं केहिं वि । अ-वंग-तिलय - पत्त - लेह—नामएहिं चिल्लएहिं संगयं - गयाहिं, भत्ति-सन्नि-विट्ठ-वंदणा गयाहिं हुंति ते वंदिआ पुणो पुणो ॥२८॥ (नाराअ ओ) ॥ तमहं जिणचंदं, अजिअं जिअ - मोहं । धुअ-सव्व किलेसं, पयओ पणमामि ॥ २९ ॥ (नंदिअयं) ॥ थुअ-वंदिअस्सा रिसि - गणदेव - गणे हिं, तो देव - वहुहिं पयओ पण-मिअस्सा । जस्स जगुत्तम-सासणअस्सा, भत्ति-वसागय-पिंडि-अआहिं । देव - वरच्छरसा वहुआहिं,-सुर - वर - रइ - गुण - पंडि-अआहिं ॥ ३० ॥ (भासुरयं) ॥ वंस-सद्-तंति - ताल-मेलिए,

तिउ-क्खगभिराम - सह मीसए कए अ, सुइ - समाणणे अ सुद्ध-सज्ज - गीअ - पायजाल घंटिआहिं, वलय - मेहला - कलावनेउरा-भिराम सह - मीसए कए य देव - नट्टिआहिं हाव - भाव-विब्भम-प्पगारएहिं, नच्चिऊण-अंग हारएहिं वंदिआ य जस्स ते सुविक्कमा कमा, तयं तिलोय-सव्व सत्त-संति - कारयं, पसंत - सव्व-पाव - दोसमेस हं नमामि संतिमुत्तमं जिणं ॥ ३१ ॥ (नाराअओ) ॥ छत्त-चामर पडाग-जूअ-जव-मंडिआ, झय-वर-मगर-तुरय - सिरिवच्छ - सुलंछणा । दीवसमुद्द - मंदर - दिसागय-सोहिआ, सत्थिय-वसह - सीह-रह चक्क-वरंकिया ॥ ३२ ॥ (ललिअयं) ॥ सहाव-लट्ठा-सम-प्पइट्ठा, अदोस-दुट्ठा गुणेहिं जिट्ठा । पसाय-सिट्ठा तवेण पुट्ठा, सिरीहिं इट्ठा रिसीहिं जुट्ठा ॥३३॥ (वाणवासिआ) ॥ ते तवेण धुअ- सव्व पावया, सव्व लोअहिअ मूल-पावया । संथुआ अजिअ - संति - पायया, हुंतु मे सिव-सुहाण दायया ॥ ३४ ॥ (अपरांतिका) ॥ एवं - तव - बल-विउलं, थुअं मए अजिय संति जिण - जुअलं । ववगयकम्म-रय-मलं, गइं गयं सासयं विउलं ॥ ३५ ॥ (गाहा) ॥ तं बहु-गुण-प्पसायं, मुक्ख सुहेण परमेण अविसायं । नासेउ मे विसायं, कुणउ अ परिसावि अ पसायं ॥ ३६ ॥ (गाहा) ॥ तं मोएउ अ नंदिं, पावेउ अ नंदिसेणमभिनन्दिं । परिसा विअ सुहनंदिं, मम य दिसउ संजमे नंदिं ॥ ३७ ॥ (गाहा) ॥ पक्खिअअ चाउम्मासिय, संवच्छरिए अवस्स-भणिअव्वो । सो अव्वो

सयल-पुहवि रज्जं छड्डिउं आसमज्जं । तवमिव पढलग्गं जे जिणा मुत्तिमग्गं, चरणमणुपवन्ना हुंतु ते मे पसन्ना ॥ १३ ॥ छण - ससि-वयणाहिं फुल्ल - नेत्तुप्पलाहिं, थण - भर नमिराहिं मुट्ठि-गिज्झोदराहिं । ललिअ-भुअलयाहिं पीण - सोणि त्थलाहिं, सइ-सुर - रमणीहिं वंदिआ जेसि पाया ॥१४॥ अरिस - किडिभ-कुट्ठ-गंठि-कासाइसार-क्खय- जर - वण-लूआ - साससोसोदराणि । नह - मुह - दसणच्छी - कुच्छिकन्नाइरोगे, मह जिण-जुअ-पाया सुप्पसाया हरंतु ॥ १५ ॥ इअ गुरु-दुह - तासे पक्खिए चाउमासे, जिणवरदुग-थुत्तं वच्छरे वा पवित्तं । पढह सुणह सज्झाएह झाएह चित्ते, कुणह मुणह विग्धं जेण घाएह सिग्धं ॥ १६ ॥ इय विजयाऽजिअसत्तुपुत्त ! सिरि - अजिअ - जिणेसर !, तह अइरा-विससेण-तणय ! पंचम-चक्कीसर ! । तित्थंकर ! सोलसम ! संति ! जिण - वल्लह - संथुअ !, कुरु मंगल मम हरसु दुरियमखिलंपि थुणंतह ॥ १७ ॥

इति द्वितीयं स्मरणम् ।

---

(३) तृतीयं नमिऊणनामकं स्मरणम् ।

नमिऊण पणय-सुर-गण-चूडामणि - किरणरंजिअं मुणिणो । चलण-जुअलं महाभय,-पणासणं संथवं वुच्छं ॥१॥ सडियकर-चरण - नह - मुह-निबुड्ड-नासा विवन्नलावण्णा । कुट्ठमहारोगा-

नल-फुलिंग - निद्दड्ढ- सव्वंगा ॥२॥ ते तुह चलणा-राहण-सलिलं-जलि-सेअ-वुड्ढिअ-च्छाया । वण - दव - दड्ढागिरि-पायवव्व पत्ता पुणो लच्छि ॥ ३ ॥ दुव्वाय-खुभिय - जलनिहि, उब्भडकल्लोल-भीसणारावे । संभंत - भय-विसंठुल,- निज्जामय-मुक्कवावारे ॥४॥ अविदलिय - जाणवत्ता, खणेण पावंति इच्छिअं कूलं । पासजिण-चलण-जुअलं, निच्चं चिअ जे नमंति नरा ॥ ५ ॥ खर-पव णुद्ध य - वणदव - जालावलि - मिलिय-सयल-दुमगहणे । डज्झंत-मुद्धमय - वहु-भीसण - रव-भीसणम्मि वणे ॥६॥ जगगुरुणो कम-जुअलं, निव्वाविय-सयल - तिहुअणाभोअं । जे संभरंति मणुआ, न कुणइ जलणो भयं तेसिं ॥ ७ ॥ विलसंत - भोगभीसण,-फुरिआरुण-नयण- तरल - जीहालं । उग्ग - भुअंगं नव,-जलय-सत्थहं भीसणायारं ॥ ८ ॥ मन्नंति कीडसरिसं,-दूर - परि - च्छूढ-विसमविस-वेगा । तुह नामक्खर - फुड - सिद्ध - मंत - गुरुआ नरा-लोए ॥ ९ ॥ अडवीसु भिल्ल-तक्कर-पुलिंदसद्-दूल - सद्दभी-मासु । भय-विहलवुन्न-कायर-उल्लूरिअ-पंहिअ-सत्थासु ॥ १० ॥ अविलुत्तविहवसारा, तुह नाह ! पणाम - मत्त - वावारा । ववगयविग्घा सिग्घं, पत्ता हिय-इच्छियं ठाणं ॥ ११ ॥ पज्जलिआ-नल-नयणं, दूर-वियारिय-मुहं महाकायं । नह-कुलिस - घायविअ-लिअ - गइंद - कुंभ - त्थलाभोअं ॥१२॥ पणय - ससंभम-पत्थिव,-नह-मणिमाणिक्क-पडिअ - पडिमस्स । तुह वयण - पहरणधरा, सीहं कुद्धंपि न गणंति ॥ १३ ॥ ससिधवल-दंतमुसलं, दीह-

कल्लोल-वुड्डिउच्छाहं । मह-पिंग-नयण-जुअलं, ससलिल-नव-जलहराऽऽरावं ॥ १४ ॥ भीमं महा-गइंदं, अच्चासन्नं पि ते न वि गणंति । जे तुम्ह चलण-जुअलं, मुणिवइ ! तुंगं समल्लीणा ॥ १५ ॥ समरम्मि तिक्ख-खग्गाभिघाय-पविद्ध-उद्धुय-कबंधे । कुंत-विणिभिन्नकरि-कलह-मुक्क-सिक्कार-पउरम्मि ॥ १६ ॥ निज्जियदप्पुद्धुररिउ-नरिंद-निवहा भडा जसं धवलं । पावंति पावपसमिण ! पासजिण ! तुह प्पभावेण ॥१७॥ रोग-जल-जलण-विसहर-चोरारि-मइंदगय-रण-भयाइं । पास-जिणनाम-संकित्तणेण पसमंति सव्वाइं ॥ १८ ॥ एवं महाभयहरं, पास-जिणिंदस्स संथवमुआरं । भविय-जणाणंदयरं, कल्लाण-परंपर-निहाणं ॥१९॥ राय-भयजक्ख-रक्खस,-कुसुमिण-दुस्सउण-रिक्ख पीडासु । संझासु दोसु पंथे, उवसग्गे तह य रयणीसु ॥ २० ॥ जो पढइ जो अ निसुणइ, ताणं कइणो य माण-तुंगस्स । पासो पावं पसमेउ, सयल-भुवणयच्चिय-चलणो ॥२१॥

इति तृतीयं स्मरणम्

---

(४) चतुर्थं गणधरदेवस्तुतिरूपं स्मरणम् ।

तं जयउ जए तित्थं, जमित्थ तित्थाहिवेण वीरेण । सम्मं पवत्तियं भव्व-सत्त-संताण-सुहजणयं ॥ १ ॥ नासिय-सयल-किलेसा, निहय-कुलेस्सा-पसत्थ-सुह-लेस्सा । सिरिवद्ध-

माणतित्थस्स, मंगलं दिंतु ते अरिहा ॥ २ ॥ निद्दड्ढकम्मबीया बीया परमेट्ठिणो गुण-समिद्धा । सिद्धा तिजय - पसिद्धा, हणंतु दुत्थाणि तित्थस्स ॥ ३ ॥ आयारमायरंता, पंच - पयारं सया पयासंता आयरिआ तह तित्थं, निहय - कुतित्थं पयासंतु ॥ ४ ॥ सम्म - सुअ - वायगा वायगा य सि-अवाय-वायगा वाए । पवयण - पडणीय - कयऽवणंतु सव्वस्स संघस्स ॥५॥ निव्वाण-साहणुज्जय-साहूणं जणिय - सव्व - साहज्जा । तित्थप्पभावगा ते, हवंतु परमेट्ठिणो जइणो ॥ ६ ॥ जेणाणुगयं णाणं, निव्वाण - फलं च चरणमवि हवइ । तित्थस्स दंसणं तं, मंगुलमवणेउ सिद्धियरं ॥ ७ ॥ निच्छम्मो सुअधम्मो, समग्ग भव्वंगि वग्ग - कय - सम्मो । गुण - सुट्ठिअस्स संघस्स, मंगलं सम्ममिह दिसउ ॥ ८ ॥ रम्मो चरित्तधम्मो, संपाविअ - भव्व सत्त - सिव - सम्मो । नीसेस- किलेसहरो, हवउ सया सयलसंघस्स ॥९॥ गुण-गण-गुरुणो गुरुणो, सिव - सुह- मइणो कुणंतु तित्थस्स । सिरी-वद्धमाण-पहु - पयडिअस्स कुसलं समग्गस्स ॥१०॥ जिय-पडिवक्खा जक्खा, गोमुह-मायंग-गयमुह पमुक्खा । सिरि बंभसंतिसहिआ, कय-नय - रक्खा सिवं दिंतु ॥११॥ अंबा पडिहयडिंबा, सिद्धा सिद्धाइया पवयणस्स । चक्केसरि-वइरुट्टा, संति सुरी दिसउ सुक्खाणि ॥ १२ ॥ सोलस विज्जा- देवीउ, दिंतु संघस्स मंगलं विउलं । अच्छुत्ता सहिआओ, विस्सुअसुयदेवयाइ समं ॥ १३ ॥ जिण - सासण - कयरक्खा, जक्खा

चउव्वीस - सामिश - मुगादि । सुहभावा संताइं तित्थस्स सया पयानन्तु ॥ १४ ॥ जिणपवयणम्मि निरया, निरया कुपहाउ सव्वहा सव्वे । वेयावच्चकरावि अ, तित्थस्स हवंतु संतिकरा ॥ १५ ॥ जिण - समय - सिद्ध-समग्ग - वहिय भव्वाण जणिय साहज्जा । गीयरई गीयजसा, सपरिवारे सिवं दिसउ ॥ १६ ॥ गिह - गुत्त - खित्त - जल - थल-वण-पव्वयवासी देव देवीओ । जिणसासण - ट्ठिआणं, दुहाणि सव्वाणि निहणंतु ॥१७॥ दस-दिसि पाला-स-क्खित्तपालया नवग्गहा सनक्खत्ता । जोइणि-राहु - ग्गह - काल-पास-कुलि-अद्ध पहरेहिं ॥ १८ ॥ सह काल-कंटएहिं, सविट्ठि - वच्छेहिं कालवेलाहिं । सव्वे सव्वत्थ सुहं, दिसन्तु सव्वस्स संघस्स ॥ १९ ॥ भवणवइ - वाणमंतर, जोइस-वेमाणिआ य जे देवा । धरणिंद - सक्कसहिआ, दलंतु दुरियाइं तित्थस्स ॥ २० ॥ चक्कं जस्स जलंतं, गच्छइ पुरओ पणा-सिय-तमोहं । तं तित्थस्स भगवओ, नमो नमो वद्ध-माणस्स ॥ २१ ॥ जो जयउ जिणो वीरो, जस्सज्जवि सासणं जए जयइ । सिद्धि - पह-सासणं - कुपह-नासणं - सव्व-भय-महणं ॥ २२ ॥ सिरि - उसभसेण - पमुहा, हय-भयनिवहा दिसन्तु तित्थस्स । सव्व जिणाणं गणहारिणोऽणहं वंछियं सव्वं ॥२३॥ सिरि-वद्धमाण - तित्थाहिवेण, तित्थं समप्पियं जस्स । सम्मं सुहम्म - सामी, दिसउ सुहं सयल संघस्स ॥ २४ ॥ पयईए भद्दिया जे, भद्दाणि दिसंतु सयल-संघस्स । इयर-सुरा वि हु

मम्मं, जिण गणहर-कहिय-कारिस्स ॥ २५ ॥ इय जो पढइ निसंकं, दुस्सज्झं तस्स नत्थि किंपि जए। जिणदत्ताणाय ठिओ सो, सुनिट्ठिय-अट्ठो सुही होइ ॥ २६ ॥

इति चतुर्थं स्मरणम्।

(५) पञ्चमं गुरुपारतन्त्र्यनामकं स्मरणम्।

मयरहियं गुण-गुण-रयण,-सायरं सायरं पणमिऊणं। सुगुरु-जण-पारतंतं, उवहिव्व थुणामि तं चेव ॥ १ ॥ निम्महिय-मोह-जोहा, निहय-विरोहा पणट्ठ-संदेहा। पणयंगि-वग्गदा-विअसुह-संदोहा सुगुण-गेहा ॥ २ ॥ पत्त-सुजइत्त-सोहा, समत्थपरतित्थ-जणियसंखोहा। पडिभग्ग-लोह-जोहा, दंसिअ-सुमहत्थसत्थोहा ॥ ३ ॥ परिहरिअ-सत्थ-वाहा, हय-दुहदाहा सिवंब-तरु साहा। संपाविअ-सुह-लाहा, खीरोदहिव्व अगाहा ॥४॥ सुगुण-जण-जणिय-पुज्जा, सज्जो निर-वज्ज-गहिय-पव्वज्जा। सिवसुह-साहणसज्जा,-भव-गुरु-गिरिचूरणे वज्जा ॥५॥ अज्जसुहम्म-प्पमुहा, गुण-गण-निवहा सुरिंद-विहियमहा। ताण निसंकं नामं, न पणासइ जियाणं ॥ ६ ॥ पडिवज्जिअ-जिण-देवो, देवायरिओ दुरंत-भवहारी। सिरि-नेमिचंद-सूरि उज्जोयण सूरिणो सुगुरू ॥ ७ ॥ सिरि वद्धमाणसूरि, पयडीकयसूरि-मंत-माहप्पो। पडिहयकसाय-पसरो, सरय-ससंकुव्व सुहजणओ ॥ ८ ॥ सुह-सील-चोर-चप्परण-पच्चलो निच्चलो जिणमयम्मि।

जुगपवर-सुद्ध - सिद्धंत - जाणओ पणयसुगुण-जणो ॥९॥ पुरओ दुल्लह-महिय,-ल्लहस्स अणहिल्लवाडए पयडं । मुक्का वियारि-ऊणं, सीहेण व दव्वलिंगि-गया ॥ १० ॥ दसमच्छेरय-निसि विष्फुरंत - सच्छन्द - सूरि-मय - तिमिरं । सूरेण व सूरि-जिणे-सरेण हय-महिअदोसेण ॥ ११ ॥ सुकइत्त पत्त कित्ती, पयडिअ गुत्ती पसंत-सुहमुत्ती । पहय परवाइ दित्ती, जिणचंद-जईसरो मंती ॥ १२ ॥ पयडिअ - नवंग-सुत्तत्थ - रयणकोसो पणासिअ-पओसो । भव - भीअ - भविअजण-मण, कय - संतोसो विगय-दोसो ॥ १३ ॥ जुग - पवरागम-सार - प्परूवणा - करण बन्धुरो धणिअं । सिरी - अभयदेव - सूरि, मुणि - पवरो परम - पस-मधरो ॥ १४ ॥ कय - सावय - संतासो, हरिव्व सारंग - भग्ग-सन्देहो । गयसमय - दप्पदलणो, आसाइय - पवर - कव्वरसो ॥ १५ ॥ भीम भव-काणणम्मि अ, दंसिअ-गुरु-वयण-रयण-संदोहो । नीसेस सत्त-गुरुओ, सूरी जिणवल्लहो जयइ ॥ १६ ॥ उवरिट्ठिअ-सच्चरणो, चउरणुओगप्पहाण - संचरणो । असम-मयराय-महणो, उड्ढमुहो सहइ जस्स करो ॥ १७ ॥ दंसिअ-निम्मलनिच्चल,-दंत-गणोगणिअ - सावओत्थ-भओ । गुरु-गिरि-गरुओ सरहुव्व सूरि जिणवल्लहो होत्था ॥ १८ ॥ जुगपवरागम-पीऊ-सपाणपीणिय-मणा कया भव्वा । जेण जिणवल्लहेणं, गुरुणा तं सव्वहा वंदे ॥ १९ ॥ विप्फुरिय - पवरपवयण - सिरोमणी वूढ-दुव्वह खमो य । जो सेसाणं सेसुव्व, सहइ सत्ताण तायकरो

॥ २० ॥ सच्चरिआणमहीणं, सुगुरूणं पारतंतमुव्वहइ । जयइ जिणदत्त-सूरि, सिरि-निलओ पणयमुणि-तिलओ ॥ २१ ॥

इति पञ्चमं स्मरणम् ।

(६) षष्ठं 'सिग्घमवहरउ' नामकं स्मरणम् ।

सिग्घमवहरउ विग्घं, जिण-वीराणाणुगामिसंघस्स । सिरि-पास-जिणो थंभण-पुर-ट्ठिओ निट्ठिआनिट्ठो ॥ १ ॥ गोयम-सुहम्म-पमुहा, गणवइणो विहिअ-भव्व-सत्त-सुहा । सिरि वद्ध-माण-जिण-तित्थ-सुत्थयं ते कुणंतु सया ॥ २ ॥ सक्काइणो सुरा जे, जिण-वेयावच्च-कारिणो संति । अवहरिय-विग्घ संघा, हवंतु ते संघ-संतिकरा ॥ ३ ॥ सिरिथंभणयट्ठिय-पास-सामि-पय-पउम-पणय-पाणीणं । निद्दलिय-दुरिय-विंदो, धरणिंदो हरउ दुरियाइं ॥ ४ ॥ गोमुहपमुक्ख जक्खा, पडिहयपडिवक्ख पक्ख लक्खा ते । कय सगुण संघ रक्खा, हवंतु संपत्त सिव सुक्खा ॥ ५ ॥ अप्पडिचक्कापमुहा, जिण सासण देवया य जिण पणया । सिद्धाइया समेया, हवंतु संघस्स विग्घ हरा ॥ ६ ॥ सक्काएसा सच्चउर पुरट्ठिओ वद्धमाण जिण भत्तो । सिरि बंभसंति जक्खो, रक्खउ संघं पयत्तेण ॥ ७ ॥ खित्त गिह गुत्त संताण देस देवाहिदेवया ताओ । निव्वुइ पुर पहिआणं, भव्वाण कुणंतु सुक्खाणि ॥ ८ ॥ चक्के-

सरि चक्कधरा, विहि पहरिउच्छिग्ग कंधरा धणियं । सिव सरणि लग्ग संघस्स, सव्वहा हरउ दिव्वाणि ॥ ९ ॥ तित्थवइ वद्धमाणो, जिणेसरो संगओ सुसंवेण । जिणचंदोऽभयदेवो, रक्खउ जिणवल्लहो पहू मं ॥ १० ॥ सो जयउ वद्धमाणो, जिणेसरो सोमरू व्व हय तिमिरो । जिणचंदाऽभयदेवा, पहुणो जिणवल्लहा जे अ ॥ ११ ॥ गुरु जिणवल्लह पाए. ऽभयदेवपहुत्त दायगे वंदे । जिणचंदजिणेसर वद्धमाण तित्थस्स वुड्ढि कए ॥ १२ ॥ जिणदत्ताणं सम्मं, मणंति कुणंति जे य कारिंति । मणसा वयसा वउसा, जयंतु साहम्मिआ ते वि ॥ १३ ॥ जिणदत्त गुणे नाणाइणो, सया जे धरिंति धरिंति । दंसिअ सिअवाय पए, नमामि साहम्मिआ ते वि १४ ॥

इति षष्ठं स्मरणम् ।

---

(७) सप्तमं उवसग्गहर-नामकं स्मरणम् ॥

उवसग्गहरं पासं, पासं वंदामि कम्मघणमुक्कं । विसहरविस निन्नासं, मंगलकल्लाण आवासं ॥ १ ॥ विसहर फुलिंग मंतं, कंठे धारेइ जो सया मणुओ । तस्स गह रोग मारी, दुट्ठ जरा जंति उवसामं ॥ २ ॥ चिट्ठउ दूरे मंतो, तुज्झ पणामो वि बहु फलो होइ । नर तिरिएसु वि जीवा, पावंति न दुक्ख दोहग्गं ॥ ३ ॥ तुह सम्मत्ते लद्धे. चिंतामणि कप्प

पायवल्भहिए । पावंति अविग्घेणं, जीवा अयरामरं ठाणं ॥ ४ ॥
इय संथुओ महायस !, भत्ति-ब्भर निब्भरेण हिअएण ।
ता देव ! दिज्ज बोहिं, भवे भवे पास ! जिणचंद ! ॥ ५ ॥

इति सप्तमं स्मरणम् ।

श्रीभक्तामर - स्तोत्रम् ।

(वसन्ततिलका-छन्दः ।)

भक्तामर-प्रणत-मौलि-मणि-प्रभाणा,-मुद्द्योतकं दलित-पाप-तमो - वितानम् । सम्यक् प्रणम्य जिन - पाद-युगं युगादा,-वालम्बनं भवजले पततां जनानाम् ॥ १ ॥ यः संस्तुतः सकलवाङ्मय - तत्त्व - बोधा, - दुद्भूत-बुद्धि-पटुभिः सुरलोक-नाथैः । स्तोत्रैर्जगत्त्रितय - चित्तहरैरुदारैः, स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥२ ॥ युग्मम् ॥ बुद्ध्या विनापि विबु-धार्चित - पादपीठ !, स्तोतुं समुद्यत - मतिर्विगतत्रपोऽहम् । बालं विहाय जल - संस्थितमिन्दु - बिम्ब, - मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥ ३ ॥ वक्तुं गुणान् गुणसमुद्र ! शशाङ्क-कान्तान्, कस्ते क्षमः सुरगुरु- प्रतिमोऽपि बुद्ध्या ? । कल्पान्त-कालपवनोद्धतनक्र - चक्रं, को वा तरीतुमलमम्बुनिधिं भुजा-भ्याम् ? ॥ ४ ॥ सोऽहं तथापि तव भक्ति - वशान्मुनीश !, कर्तुं

स्तवं विगत-शक्तिरपि प्रवृत्तः । प्रीत्यात्म - वीर्यमविचार्य मृगो मृगेन्द्रं, नाभ्येति किं निज- शिशोः परिपालनार्थम् ? ॥ ५ ॥ अल्पश्रुतं श्रुतवतां परिहास - धाम, त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् । यत् कोकिलः किल मधौ मधुरं विरौति, तच्चाम्र-चूतकलिका - निकरैक - हेतुः ॥ ६ ॥ त्वत्संस्तवेन भव-संतति-सन्निबद्धं, पापं क्षणात् क्षयमुपैति शरीरभाजाम् । आक्रान्त-लोकमलि - नीलमशेषमाशु, सूर्यांशु - भिन्नमिव शार्वरमन्धकारम् ॥ ७ ॥ मत्वेति नाथ ! तव संस्तवनं मयेद, - मारभ्यते तनु-धियापि तव प्रभावात् । चेतो हरिष्यति सतां नलिनी - दलेषु, मुक्ताफलद्युतिमुपैति ननूद - बिन्दुः ॥ ८ ॥ आस्तां तव स्तवन-मस्त - समस्त - दोषं, त्वत्संकथापि जगतां दुरितानि हन्ति । दूरे सहस्र - किरणः कुरुते प्रभैव, पद्माकरेषु जलजानि विकासभाञ्जि ॥ ९ ॥ नात्यद्भुतं भुवन - भूषण ! भूतनाथ !, भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः । तुल्या भवन्ति भवतो ननु तेन किं वा, भूत्याश्रितं य इह नात्म - समं करोति ? ॥१०॥ दृष्ट्वा भवन्त-मनिमेषविलोकनीयं, नान्यत्र तोषमुपयाति जनस्य चक्षुः । पीत्वा पयः शशि - कर - द्युतिदुग्धसिन्धोः, क्षारं जलं जल-निधेरशितुं क इच्छेत् ? ॥ ११ ॥ यैः शान्तराग - रुचिभिः परमाणुभिस्त्वं, निर्मापितस्त्रिभुवनैक - ललामभूत ! । तावन्त एव खलु तेऽप्यणवः पृथिव्यां, यत्ते समानमपरं न हि रूपमस्ति ॥१२॥ वक्त्रं क्व ते सुर - नरोरग - नेत्र - हारि, निःशेषनिर्जित-

जगत् - त्रितयोपमानम् । बिम्बं कलङ्कमलिनं क्व निशाकरस्य, यद् वासरे भवति पाण्डु - पलाश - कल्पम् ॥ १३ ॥ सम्पूर्ण-मण्डल-शशाङ्क-कला-कलाप-शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति । ये संश्रितास्त्रिजगदीश्वर-नाथमेकं, कस्तान् निवारयति संचरतो यथेष्टम् ? ॥ १४ ॥ चित्रं किमत्र यदि ते त्रिदशाङ्गनाभि - र्नीतं मनागपि मनो न विकार - मार्गम् । कल्पान्त-कालमरुता चलिताचलेन, किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥ १५ ॥ निर्धूम - वर्त्तिरपवर्जित - तैलपूरः,कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि । गम्यो न जातु मरुतां चलिताचलानां, दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६ ॥ नास्तं कदाचिदुपयासि न राहुगम्यः, स्पष्टीकरोषि सहसा युगपज्जगन्ति । नाम्भोधरोदरनिरुद्ध - महा - प्रभावः, सूर्यातिशायि - महिमाऽसि मुनीन्द्र ! लोके ॥ १७ ॥ नित्योदयं दलित - मोह - महान्धकारं, गम्यं न राहु - वदनस्य न वारिदानाम् । विभ्राजते तव मुखाब्जमनल्प - कान्ति, विद्योतयज्जग - दपूर्वशशाङ्क-बिम्बम् ॥१८॥ किं शर्वरीषु शशिनाऽह्नि विवस्वता वा ?, युष्मन्मुखेन्दु - दलितेषु तमस्सु नाथ ! । निष्पन्नशालिवनशालिनि जीवलोके, कार्यं कियज्जलधरैर्जल - भार - नम्रैः ? ॥ १९ ॥ ज्ञानं यथा त्वयि विभाति कृतावकाशं, नैवं तथा हरिहरादिषु नायकेषु । तेजः स्फुरन्मणिषु याति यथा महत्त्वं, नैवं तु काच - शकले किरणाकुलेऽपि ॥ २० ॥ मन्ये वरं हरिहरादय एव दृष्टा, दृष्टेषु येषु

हृदयं त्वयि तोषमेति । किं वीक्षितेन भवता भुवि येन नान्यः,
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१ ॥ स्त्रीणां शतानि
शतशो जनयन्ति पुत्रान्, नान्या सुतं त्वदुपमं जननी प्रसूता ।
सर्वा दिशो दधति भानि सहस्र - रश्मिं, प्राच्येव दिग्जनयति
स्फुरदंशु - जालम् ॥ २२ ॥ त्वामामनन्ति मुनयः परमं पुमांस-
मादित्य - वर्णममलं तमसः परस्तात् । त्वामेव सम्यगुपलभ्य
जयन्ति मृत्युं, नान्यः शिवः शिव-पदस्य मुनीन्द्र ! पन्थाः
॥ २३ ॥ त्वामव्ययं विभुमचिन्त्यमसंख्यमाद्यं, ब्रह्माणमीश्वर-
मनन्तमनङ्गकेतुम् । योगीश्वरं विदितयोगमनेकमेकं, ज्ञान-स्वरू-
पममलं प्रवदन्ति सन्तः ॥ २४ ॥ बुद्धस्त्वमेव विबुधार्चित !
बुद्धि - बोधात्, त्वं शंकरोऽसि भुवनत्रय - शंकरत्वात् । धाताऽसि
धीर ! शिवमार्गविधेर्विधानाद्, व्यक्तं त्वमेव भगवन् ! पुरुषो-
त्तमोऽसि ॥ २५ ॥ तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !, तुभ्यं
नमः क्षिति-तलामल-भूषणाय । तुभ्यं नमस्त्रिजगतः परमेश्वराय,
तुभ्यं नमो जिन ! भवोदधि-शोषणाय ॥२६॥ को विस्मयोऽत्र ?
यदि नाम गुणैरशेषै - स्त्वं संश्रितो निरवकाशतया मुनीश ! ।
दोषै - रुपात्त - विविधाश्रयजात - गर्वैः, स्वप्नान्तरेऽपि न कदा-
चिदपीक्षितोऽसि ॥ २७ ॥ उच्चैरशोक - तरु - संश्रितमुन्मयूख,-
माभाति रूपममलं भवतो नितान्तम् । स्पष्टोल्लसत्किरण - मस्त-
तमो - वितानं, बिम्बं रवेरिव पयोधर - पार्श्ववर्त्ति ॥ २८ ॥
सिंहासने मणि - मयूखशिखा - विचित्रे, विभ्राजते तव वपुः

कनकावदातम् । बिम्बं वियद्विलसदंशु - लता - वितानं, तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९ ॥ कुन्दावदात-चल-चामर-चारु-शोभं, विभ्राजते तव वपुः कलधौतकान्तम् । उद्यच्छशाङ्क-शुचि-निर्झर-वारिधार-मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३० ॥ छत्र-त्रयं तव विभाति शशाङ्ककान्त-मुच्चैःस्थितं स्थगित-भानु-करप्रतापम् । मुक्ताफल-प्रकरजाल-विवृद्ध-शोभं, प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१ ॥ उन्निद्र-हेम-नव-पङ्कज-पुञ्जकान्ति-पर्युल्लसन्नखमयूख-शिखाभिरामौ । पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः, पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२ ॥ इत्थं यथा तव विभूतिरभूज्जिनेन्द्र ! धर्मोपदेशन-विधौ न तथा परस्य । यादृक् प्रभा दिनकृतः प्रहतान्धकारा, तादृक् कुतो ग्रह-गणस्य विकाशिनोऽपि ? ॥ ३३ ॥ श्च्योतन्मदाविल-विलोल-कपोल-मूल, मत्त-भ्रमद्-भ्रमर-नाद-विवृद्ध - कोपम् । ऐरावताभमिभमुद्धतमापतन्तं, दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४॥ भिन्नेभ-कुम्भ-गलदुज्ज्वल-शोणिताक्त-मुक्ताफल-प्रकर-भूषित-भूमि-भागः । बद्धक्रमः क्रम-गतं हरिणाधिपोऽपि, नाक्रामति क्रमयुगाचल - संश्रितं ते ॥ ३५ ॥ कल्पान्त-काल - पवनोद्धत-वह्नि - कल्पं, दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् । विश्वं जिघत्सुमिव संमुखमापतन्तं, त्वन्नाम - कीर्तन - जलं शमयत्यशेषम् ॥ ३६ ॥ रक्तेक्षणं समदकोकिल - कण्ठ - नीलं, क्रोधोद्धतं

फणिनमुत्फणमापतन्तम् । आक्रामति क्रम - युगेन निरस्त-शङ्क-स्त्वन्नाम-नाग-दमनी हृदि यस्य पुंसः ॥ ३७ ॥ वल्गत्तुरङ्ग-गज-गर्जित - भीम - नाद, - माजौ बलं बलवतामपि भूपतीनाम् । उद्यद्दिवाकर - मयूख - शिखाऽपविद्धं, त्वत्कीर्त्तनात् तम इवाशु भिदामुपैति ॥ ३८ ॥ कुन्ताग्र- भिन्न—गज—शोणित-वारिवाह,-वेगावतार - तरणातुर - योध-भीमे । युद्धे जयं विजित-दुर्ज्जयजेय-पक्षा,-स्त्वत्पाद - पङ्कजवनाश्रयिणो लभन्ते ॥ ३९ ॥ अम्भोनिधौ क्षुभितभीषण - नक्रचक्र - पाठीन-पीठ- भयदोल्बण-वाडवाग्नौ । रङ्ग - त्तरंग - शिखर - स्थित-यानपात्रा,-स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४० ॥ उद्भूत - भीषण-जलोदर-भार-भुग्ना', शोच्यां दशामुपगताश्च्युत — जीविताशाः । त्व-त्पाद - पङ्कजरजोऽमृत - दिग्ध - देहा, मर्त्या भवन्ति मकरध्वज-तुल्यरूपाः ॥ ४१ ॥ आपाद - कण्ठमुरु - शृङ्खलवेष्टिताङ्गा, गाढं बृहन्निगड - कोटि - निघृष्टजङ्घाः । त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः, सद्यः स्वयं विगत - बन्ध - भया भवन्ति ॥ ४२ ॥ मत्त - द्विपेन्द्रमृगराज - दवानलाहि - संग्राम-वारिधि-महोदर-बन्धनोत्थम् । तस्याशु नाशमुपयाति भयं भियेव, यस्तावकं स्तव-मिमं मतिमानधीते ॥ ४३ ॥ स्तोत्रस्रजं तव जिनेन्द्र ! गुणै-र्निबद्धां, भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् । धत्ते जनो य इह कण्ठगतामजस्रं, तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥४४॥

इति श्रीभक्तामरस्तोत्रं संपूर्णम् ॥

श्रीकल्याणमन्दिरस्तोत्रम् ।

(वसन्ततिलका-छन्दः ।)

कल्याणमन्दिरमुदारमवद्यभेदि,–भीताभयप्रदमनिन्दितमङ्घ्रि-पद्मम् । संसारसागरनिमज्जदशेषजन्तु, - पोतायमानमभिनम्य जिनेश्वरस्य ॥ १ ॥ यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः, स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम् । तीर्थेश्वरस्य कमठस्मय-धूमकेतो,–स्तस्याहमेष किल संस्तवनं करिष्ये ॥ २ ॥ युग्मम् ।
सामान्यतोऽपि तव वर्णयितुं स्वरूप,–मस्मादृशाः कथमधीश ! भवन्त्यधीशाः ? । धृष्टोऽपि कौशिकशिशुर्यदि वा दिवान्धो, रूपं प्ररूपयति किं किल घर्मरश्मेः ? ॥ ३ ॥ मोहक्षयादनुभवन्नपि नाथ ! मर्त्यो, नूनं गुणान् गणयितुं न तव क्षमेत । कल्पान्त-वान्तपयसः प्रकटोऽपि यस्मा,–न्मीयेत केन जलधेर्ननु रत्नराशिः ॥ ४ ॥ अभ्युद्यतोऽस्मि तव नाथ ! जडाशयोऽपि, कर्तुं स्तवं लसदसंख्यगुणाकरस्य । बालोऽपि किं न निजबाहुयुगं वितत्य, विस्तीर्णतां कथयति स्वधियाम्बुराशेः ॥ ५ ॥ ये योगिनामपि न यान्ति गुणास्तवेश !, वक्तुं कथं भवति तेषु ममावकाशः । जाता तदेवमसमीक्षितकारितेयं, जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥ ६ ॥ आस्तामचिन्त्यमहिमा जिन ! संस्तवस्ते, नामापि पाति भवतो भवतो जगन्ति । तीव्रातपोपहतपान्थजना-न्निदाघे, प्रीणाति पद्मसरसः सरसोऽनिलोऽपि ॥ ७ ॥ हृद्वर्तिनि त्वयि विभो ! शिथिलीभवन्ति, जन्तोः क्षणेन निबिडा अपि कर्मबन्धाः । सद्यो भुजङ्गममया इव मध्यभाग, - मभ्यागते वनशिखण्डिनि चन्दनस्य ॥ ८ ॥ मुच्यन्त एव मनुजाः

सहसा जिनेन्द्र !, रौद्रैरुपद्रवशतैस्त्वयि वीक्षितेऽपि । गोस्वामिनि स्फुरिततेजसि दृष्टमात्रे, चौरैरिवाशु पशवः प्रपलायमानैः ॥ ९ ॥ त्वं तारको जिन ! कथं भविनां त एव, त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः । यद्वा दृतिस्तरति यज्जलमेष नून,-मन्तर्गतस्य मरुतः स किलानुभावः ॥ १० ॥ यस्मिन् हर-प्रभृतयोऽपि हतप्रभावाः, सोऽपि त्वया रतिपतिः क्षपितः क्षणेन । विध्यापिता हुतभुजः पयसाऽथ येन, पीतं न किं तदपि दुर्धरवाडवेन ? ॥ ११ ॥ स्वामिन्ननल्पगरिमाणमपि प्रपन्ना,स्त्वां जन्तवः कथमहो हृदये दधानाः । जन्मोदधिं लघु तरन्त्यतिलाघवेन, चिन्त्यो न हन्त महतां यदि वा प्रभावः ॥ १२ ॥ क्रोधस्त्वया यदि विभो ! प्रथमं निरस्तो, ध्वस्तास्तदा बत कथं किल कर्म-चौराः । प्लोषत्यमुत्र यदि वा शिशिरोऽपि लोके, नीलद्रुमाणि विपिनानि न किं हिमानी ॥ १३ ॥ त्वां योगिनो जिन ! सदा परमात्मरूप,-मन्वेषयन्ति हृदयाम्बुजकोशदेशे । पूतस्य निर्मलरुचेर्यदि वा किमन्य,दक्षस्य सम्भवि पदं ननु कर्णिकायाः ॥ १४ ॥ ध्यानाज्जिनेश ! भवतो भविनः क्षणेन, देहं विहाय परमात्मदशां व्रजन्ति । तीव्रानलादुपलभावमपास्य लोके, चामीकरत्वमचिरादिव धातुभेदाः ॥ १५ ॥ अन्तः सदैव जिन ! यस्य विभाव्यसे त्वं, भव्यैः कथं तदपि नाशयसे शरीरम् । एतत्स्वरूपमथ मध्यविवर्त्तिनो हि, यद्विग्रहं प्रशमयन्ति महानुभावाः

॥१६॥ आत्मा मनीषिभिरयं त्वदभेदबुद्ध्या, ध्यातो जिनेन्द्र ! भवतीह भवत्प्रभावः । पानीय-मप्यमृतमित्यनुचिन्त्यमानं, किं नाम नो विष-विकारमपाकरोति ? ॥ १७ ॥ त्वामेव वीततमसं परवादिनोऽपि, नूनं विभो ! हरिहरादिधिया प्रपन्नाः । किं काचकामलिभिरीश ! सितोऽपि शङ्खो, नो गृह्यते विविधवर्ण-विपर्ययेण ? ॥ १८ ॥ धर्मोपदेशसमये सविधानुभावा,-दास्तां जनो भवति ते तरुरप्यशोकः । अभ्युद्गते दिनपतौ समहीरुहो ऽपि, किं वा विबोधमुपयाति न जीवलोकः ॥ १९ ॥ चित्रं विभो ! कथमवाङ्मुखवृन्तमेव, विष्वक् पतत्य विरला सुरपुष्प-वृष्टिः । त्वद्गोचरे सुमनसां यदि वा मुनीश !, गच्छन्ति नूनमध एव हि बन्धनानि ॥ २० ॥ स्थाने गभीरहृदयोदधिसम्भवायाः, पीयूषतां तव गिरः समुदीरयन्ति । पीत्वा यतः परमसम्मदसङ्ग-भाजो, भव्या व्रजन्ति तरसाप्यजरामरत्वम् ॥ २१ ॥ स्वामिन् ! सुदूरमवनम्य समुत्पतन्तो, मन्ये वदन्ति शुचयः सुरचामरौघाः । येऽस्मै नतिं विदधते मुनिपुङ्गवाय, ते नूनमूर्ध्वगतयः खलु शुद्ध-भावाः ॥ २२ ॥ श्यामं गभीर-गिरमुज्ज्वलहेमरत्न, - सिंहासनस्थमिह भव्यशिखण्डिनस्त्वाम् । आलोकयन्ति रभसेन नदन्त-मुच्चै,-श्चामीकराद्रिशिरसीव नवाम्बुवाहम् ॥ २३ ॥ उद्गच्छता तव शितिद्युतिमण्डलेन, लुप्तच्छदच्छविरशोकतरुर्बभूव । सान्निध्यतोऽपि यदि वा तव वीतराग !, नीरागतां व्रजति को न सचेतनोऽपि ॥ २४ ॥ भो भोः प्रमादमवधूय भजध्वमेन,

मागत्य निर्वृतिपुरीं प्रति सार्थवाहम् । एतन्निवेदयति देव! जगत्त्रयाय, मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥ २५ ॥ उद्योतितेषु भवता भुवनेषु नाथ!, तारान्वितो विधुरयं विहताधिकारः । मुक्ताकलापकलितोच्छ्वसितातपत्र, व्याजात्त्रिधा धृततनुर्ध्रुव मभ्युपेतः ॥ २६ ॥ स्वेन प्रपूरितजगत्त्रयपिण्डितेन, कान्तिप्रतापयशसामिव सञ्चयेन । माणिक्यहेमरजतप्रविनिर्मितेन, सालत्रयेण भगवन्नभितो-विभासि ॥ २७ ॥ दिव्यस्रजो जिन ! नमत्त्रिदशाधिपाना,-मुत्सृज्य रत्नरचितानपि मौलिबन्धान् । पादौ श्रयन्ति भवतो यदि वा परत्र, त्वत्सङ्गमे सुमनसो न रमन्त एव ॥ २८ ॥ त्वं नाथ ! जन्मजलधेर्विपराङ्मुखोऽपि, यत्तारयस्यसुमतो निजपृष्ठलग्नान् । युक्तं हि पार्थिवनिपस्य सतस्तवैव, चित्रं विभो ! यदसि कर्म–विपाकशून्यः ॥ २९ ॥ विश्वेश्वरोऽपि जनपालक ! दुर्गतस्त्वं, किं वाऽक्षरप्रकृतिरप्यलिपिस्त्वमीश ! । अज्ञानवत्यपि सदैव कथञ्चिदेव, ज्ञानं त्वयि स्फुरति विश्वविकासहेतुः ॥ ३० ॥ प्राग्भारसम्भृतनभांसि रजांसि रोषा-दुत्थापितानि कमठेन शठेन यानि । छायाऽपि तैस्तव न नाथ ! हता हताशो, ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा ॥ ३१ ॥ यद्गर्जदूर्जितघनौघमदभ्रभीमं, भ्रश्यत्तडिन्मुसलमांसलघोरधारम् । दैत्येन मुक्तमथ दुस्तरवारि दध्रे, तेनैव तस्य जिन ! दुस्तरवारिकृत्यम् ॥ ३२ ॥ ध्वस्तोर्ध्वकेशविकृताकृतिमर्त्यमुण्ड-प्रालम्बभृद्भयदवक्त्रविनिर्यदग्निः । प्रेतव्रजः प्रति भवन्तमपीरितो यः, सो-

ऽस्याऽभवन्प्रतिभवं भवदुःखहेतुः ॥ ३३ ॥ धन्यास्त एव भुवना-
धिप ! ये त्रिसन्ध्य,-माराधयन्ति विधिवद्विधुतान्यकृत्याः ।
भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः, पादद्वयं तव विभो ! भुवि
जन्मभाजः ॥ ३४ ॥ अस्मिन्नपारभववारिनिधौ मुनीश !, मन्ये
न मे श्रवणगोचरतां गतोऽसि । आकर्णिते तु तव गोत्रपवित्रमन्त्रे,
किं वा विपद्विषधरी सविधं समेति ? ॥ ३५ ॥ जन्मान्तरेऽपि तव
पादयुगं न देव !, मन्ये मया महितमीहितदानदक्षम् । तेनेह
जन्मनि मुनीश ! पराभवानां, जातो निकेतनमहं मथिताशा-
यानाम् ॥ ३६ ॥ नूनं न मोहतिमिरावृतलोचनेन, पूर्वं विभो !
सकृदपि प्रविलोकितोऽसि । मर्माविधो विधुरयन्ति हि माम-
नर्थाः, प्रोद्यत्प्रबन्धगतयः कथमन्यथैते ॥ ३७ ॥ आकर्णितोऽपि
महितोऽपि निरीक्षितोऽपि, नूनं न चेतसि मया विधृतोऽसि
भक्त्या । जातोऽस्मि तेन जनबान्धव ! दुःखपात्रं, यस्मात् क्रियाः
प्रतिफलन्ति न भावशून्याः ॥ ३८ ॥ त्वं नाथ ! दुःखिजन-
वत्सल ! हे शरण्य !, कारुण्यपुण्यवसते वशिनां वरेण्य ! । भक्त्या
नते मयि महेश ! दयां विधाय, दुःखाङ्कुरोद्दलनतत्परतां विधेहि
॥ ३९ ॥ निःसंख्यसारशरणं शरणं शरण्य,-मासाद्य सादितरि-
पुप्रथितावदानम् । त्वत्पादपङ्कजमपि प्रणिधानवन्ध्यो,-वध्योऽस्मि
चेद् भुवनपावन ! हा हतोऽस्मि ॥ ४० ॥ देवेन्द्रवन्द्य ! विदिता-
खिलवस्तुसार !, संसारतारक ! विभो ! भुवनाधिनाथ ! । त्रायस्व
देव ! करुणाह्रद ! मां पुनीहि, सीदन्तमद्य भयदव्यसनाम्बुराशेः

॥४१॥ यद्यस्ति नाथ ! भवदङ्घ्रिसरोरुहाणां, भक्तेः फलं किमपि सन्ततिमञ्चितायाः । तन्मे त्वदेकशरणस्य शरण्य ! "भूयाः, स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि" ॥ ४२ ॥ इत्थं समाहित-धियो विधिवज्जिनेन्द्र !, सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागाः । त्वद्बिम्बनिर्मलमुखाम्बुजबद्धलक्ष्या, ये संस्तवं तव विभो ! रच-यन्ति भव्याः ॥ ४३ ॥ जननयनकुमुदचन्द्र — प्रभास्वराः स्वर्गसंपदो भुक्त्वा । ते विगलितमलनिचया, अचिरान्मोक्षं प्रपद्यन्ते ॥ युग्मम् ॥ ४४ ॥ इति ॥

श्रीभद्रबाहुस्वामिविरचिता ग्रहशान्तिः ।

जगद्गुरुं नमस्कृत्य, श्रुत्वा सद्गुरुभाषितम् । ग्रहशान्तिं प्रव-क्ष्यामि, लोकानां सुखहेतवे ॥१ ॥ जिनेन्द्रैः खेचरा ज्ञेयाः, पूजनीया विधिक्रमात् । पुष्पैर्विलेपनैर्धूपै, - नैवेद्यैस्तुष्टिहेतवे ॥ २ ॥ पद्मप्रभस्य मार्त्तण्ड,—श्चन्द्रश्चन्द्रप्रभस्य च । वासुपूज्ये भूमिपुत्रो, बुधोऽप्यष्टजिनेषु च ॥ ३ ॥ विमलानन्तधर्माराः, शान्तिः कुन्थुर्नमिस्तथा । वर्धमानस्तथैतेषां, पादपद्मे बुधं न्यसेत् ॥ ४ ॥ ऋषभाऽजितसुपार्श्वा,-श्चाभिनन्दनशीतलौ । सुमतिः संभवस्वामी, श्रेयांसश्चेषु गीष्पतिः ॥ ५ ॥ सुविधेः कथितः शुक्रः, सुव्रतस्य शनैश्वरः । नेमिनाथे भवेद्राहुः, केतुः श्रीमल्लिपार्श्वयोः ॥ ६ ॥ जन्मलग्ने च राशौ च, यदा पीड्यन्ति खेचराः । तदा सम्पूजयेद्धीमान्, खेचरैः सहितान् जिनान् ॥ ७ ॥

नवग्रहपूजा।

पद्मप्रभजिनेन्द्रस्य, नामोच्चारेण भास्करः। शान्तिं तुष्टिं च पुष्टिं च, रक्षां कुरु कुरु श्रियम् ॥ १ ॥ इति श्रीसूर्यपूजा ॥ चन्द्रप्रभजिनेन्द्रस्य, नाम्ना तारागणाधिपः। प्रसन्नो भव शान्तिं च, रक्षां कुरु जयं ध्रुवम् ॥ २ ॥ इति श्रीचन्द्रपूजा ॥ सर्वदा वासुपूज्यस्य, नाम्ना शान्तिं जयश्रियम्। रक्षां कुरु धरासूनो, अशुभोऽपि शुभो भव ॥ ३ ॥ इति श्रीभौमपूजा ॥ विमलानन्तधर्माराः, शान्तिः कुन्थुर्नमिस्तथा। महावीरश्च तन्नाम्ना, शुभो भूयाः सदा बुधः ॥ ४ ॥ इति श्रीबुधपूजा ॥ ऋषभाजितसुपार्श्वाश्चाभिनन्दनशीतलौ। सुमतिः संभवस्वामी, श्रेयांसश्च जिनोत्तमः ॥ ५ ॥ एतत्तीर्थकृतां नाम्ना, पूज्योऽशुभः शुभो भव। शान्तिं तुष्टिं च पुष्टिं च, कुरु देवगणार्चितः ॥ ६ ॥ इति श्रीगुरुपूजा ॥ पुष्पदन्तजिनेन्द्रस्य, नाम्ना दैत्यगणार्चितः। प्रसन्नो भव शान्तिं च, रक्षां कुरु कुरु श्रियम् ॥ ७ ॥ इति श्रीशुक्रपूजा ॥ श्रीसुव्रतजिनेन्द्रस्य, नाम्ना सूर्याङ्गसंभवः। प्रसन्नो भव शान्तिं च, रक्षां कुरु कुरु श्रियम् ॥ ८ ॥ इति श्रीशनैश्चरपूजा ॥ श्रीनेमिनाथतीर्थेश,-नामतः सिंहिकासुतः। प्रसन्नो भव शान्तिं च, रक्षां कुरु कुरु श्रियम् ॥ ९ ॥ इति श्रीराहुपूजा ॥ राहोः सप्तमराशिस्थ,-कारणे दृश्यमंबरे। श्रीमल्लिपार्श्वयोर्नाम्ना, केतोः शान्तिं जयश्रियम् ॥ १० ॥ इति श्रीकेतुपूजा ॥ इति भगिन्या स्वस्वग्रहशुभाशुभनिवेशजिनग्रहपूजा कार्या, तेन सर्वपापापाः शान्तिर्भवति। अथ सर्वेषां वा महाग्रामेश्वरश्रीवाणामयं विधिः ॥

नव-कोष्टकमालेख्यं, मंडलं चतुरस्रकम्। ग्रहास्तत्र प्रतिष्ठाप्या वक्ष्यमाणाः क्रमेण तु ॥ ११ ॥ मध्ये हि भास्करः स्थाप्यः पूर्वदक्षिणतः शशी। दक्षिणस्यां धरासूनु-र्बुधः पूर्वोत्तरेण च ॥ १२ ॥ उत्तरस्यां सुराचार्यः, पूर्वस्यां भृगुनन्दनः। पश्चिमायां शनिः स्थाप्यो, राहुर्दक्षिणपश्चिमे ॥ १३ ॥ पश्चिमोत्तरतः केतु-रिति स्थाप्याः क्रमाद् ग्रहाः। पट्टे स्थालेऽथ वाऽऽग्नेय्यां, ईशान्यां तु सदा बुधैः ॥ १४ ॥ आर्या ॥ आदित्यसोममङ्गल-बुधगुरुशुक्राः शनैश्चरो राहुः। केतुप्रमुखाः खेटा, जिनपति-पुरतोऽवतिष्ठन्तु ॥ १५ ॥ इति भणित्वा पंचवर्णकुसुमाञ्जलिक्षेपश्च जिनपूजा च कार्या। पुष्पगन्धादिभिर्धूपै र्नैवेद्यैः फलसंयुतैः। वर्णसदृशदानैश्च, वस्त्रैश्च दक्षिणान्वितैः ॥ १६ ॥ जिननामकृतो-च्चारा, देशनक्षत्रवर्णकैः। पूजिता संस्तुता भक्त्या, ग्रहाः सन्तु सुखावहाः ॥ १७ ॥ जिनानामग्रतः स्थित्वा, ग्रहाणां शान्ति-हेतवे। नमस्कारशतं भक्त्या, जपेदष्टोत्तरं शतम् ॥ १८ ॥ एवं यथानामकृताभिषेकै - रालेपनैर्धूपनपूजनैश्च। फलैश्च नैवेद्यवरैर्जि-नानां, नाम्ना ग्रहेन्द्रा वरदा भवन्तु ॥ १९ ॥ साधुभ्यो दीयते दानं, महोत्साहो जिनालये। चतुर्विधस्य सङ्घस्य, बहुमानेन पूजनम् ॥ २० ॥ भद्रबाहुरुवाचेदं, पञ्चमः श्रुतकेवली। विद्या-प्रवादतः पूर्वात्, ग्रहशान्तिरुदीरिता ॥ २१ ॥ इति ॥

अथ नवग्रह-पूजा-जाप-विधिः ॥

कस्मिन् ग्रहे कस्य जिनस्य कया रीत्या पूजा कार्या तदा-ख्याति । रविपीडायाम् —रक्तपुष्पैः श्रीपद्मप्रभपूजा कार्या, 'ॐ ह्रीं नमो सिद्धाणं' तस्य अष्टोत्तरशतजपः कार्यः । चन्द्रपीडायाम्— चंदनसेवन्त्रपुष्पैः श्रीचन्द्रप्रभपूजा कार्या, 'ॐ ह्रीं नमो आयरि-याणं' तस्य अष्टोत्तरशतजपः कार्यः । भौमपीडायाम्— कुंकुमेन च रक्तपुष्पैः श्रीवासुपूज्यपूजा विधेया, 'ॐ ह्रीं नमो सिद्धाणं' एतस्य अष्टोत्तरशतजपः कार्यः । बुधपीडायाम्— दुग्धस्नाननैवेद्यफलादिभिः श्रीशान्तिनाथपूजा कर्त्तव्या, 'ॐ ह्रीं नमो आयरियाणं' एतस्य अष्टोत्तरशतजपः कार्यः । गुरुपीडायाम् — दधिभोजनजम्बीरादिफलेन च चन्दनादिविलेपनेन श्रीआदिनाथपूजा करणीया,' 'ॐ ह्रीं नमो आयरियाणं', एतस्य अष्टोत्तरशतजपः कर्त्तव्यः । शुक्रपीडायाम्— श्वेतपुष्पैश्चन्दनादिना श्रीसुविधिनाथपूजा कार्या, चैत्ये घृतदानं कार्यम् । 'ॐ ह्रीं नमो अरिहंताणं' एतस्य अष्टोत्तरशतजपः कार्यः । शनैश्चरपीडायाम्— नीलपुष्पैः श्रीमुनिसुव्रतपूजा कार्या, तैल-स्नान-दाने कर्त्तव्ये, 'ॐ ह्रीं नमो लोए सव्व साहूणं,' एतस्य अष्टोत्तर-शतजपः कार्यः । राहुपीडायाम्— नीलपुष्पैः श्रीनेमिनाथपूजा कर-णीया, 'ॐ ह्रीं नमो लोए सव्वसाहूणं' एतस्य अष्टोत्तरशतजपः कार्यः । केतुपीडायाम्— दाडिमादिपुष्पैः श्रीपार्श्वनाथपूजा कार्या, 'ॐ ह्रीं नमो लोए सव्वसाहूणं' एतस्य अष्टोत्तरशतजपः कार्यः । इति । सर्वग्रह-पीडायाम्— श्रीसूर्य-सोमाङ्गारक-बुध-बृहस्पति-शुक्र-शनैश्चर-राहु-केतवः सर्वे ग्रहा मम सानुग्रहा भवन्तु स्वाहा । 'ॐ ह्रीं अ सि आ उ सा नमः स्वाहा' एतस्य मंत्रस्य अष्टोत्तरशतजपः कार्यः, तेन नवग्रहपीडोपशान्तिः स्यात् ॥ इति नवग्रहपूजाजापविधिः ॥

श्रीजिनपञ्जरस्तोत्रम् ।

ॐ ह्रीं श्रीं अर्हं अर्हद्भ्यो नमो नमः । ॐ ह्रीं श्रीं अर्हं सिद्धेभ्यो नमो नमः । ॐ ह्रीं श्रीं अर्हं आचार्येभ्यो नमो नमः । ॐ ह्रीं श्रीं अर्हं उपाध्यायेभ्यो नमो नमः । ॐ ह्रीं श्रीं अर्हं श्रीगौतमस्वामिप्रमुखसर्वसाधुभ्यो नमो नमः ॥ १ ॥ एष पञ्च-नमस्कारः, सर्वपापक्षयङ्करः । मङ्गलानां च सर्वेषां, प्रथमं भवति मङ्गलम् ॥ २ ॥ ॐ ह्रीं श्रीं जये विजये, अर्हं परमात्मने नमः । कमलप्रभसूरीन्द्रो, भाषते जिनपञ्जरम् ॥ ३ ॥ एकभक्तोपवासेन, त्रिकालं यः पठेदिदम् । मनोऽभिलषितं सर्वं, फलं स लभते ध्रुवम् ॥ ४ ॥ भूशय्या - ब्रह्मचर्येण, क्रोधलोभ-विवर्जितः । देवताग्रे पवित्रात्मा, षण्मासैर्लभते फलम् ॥ ५ ॥ अर्हन्तं स्थापयेन्मूर्ध्नि, सिद्धं चक्षुर्ललाटके । आचार्यं श्रोत्रयोर्मध्ये, उपाध्यायं तु नासिके ॥ ६ ॥ साधुवृन्दं मुखस्याग्रे, मनःशुद्धिं विधाय च । सूर्यचन्द्रनिरोधेन, सुधीः सर्वार्थसिद्धये ॥ ७ ॥ दक्षिणे मदनद्वेषी, वामपार्श्वे स्थितो जिनः । अंगसंधिषु सर्वज्ञः, परमेष्ठी शिवङ्करः ॥ ८ ॥ पूर्वाशां च जिनो रक्षेद्, आग्नेयीं विजितेन्द्रियः । दक्षिणाशां परं ब्रह्म, नैरृतिं च त्रिकालवित् ॥ ९ ॥ पश्चिमाशां जगन्नाथो, वायव्यां परमेश्वरः । उत्तरां तीर्थकृत्सर्वा-मीशानेऽपि निरञ्जनः ॥ १० ॥ पातालं भगवानर्ह-न्नाकाशं पुरुषोत्तमः । रोहिणीप्रमुखा देव्यो, रक्षन्तु सकलं कुलम् ॥ ११ ऋषभो मस्तकं रक्षेद्, अजितोऽपि विलोचने । संभवः कर्णयुगलेऽभिनन्दनस्तु नासिके ॥१२ ॥ ओष्ठौ श्रीसुमती

रक्षेद्, दन्तान् पद्मप्रभो विभुः। जिह्वां सुपार्श्वदेवोऽयं, तालु चन्द्रप्रभाभिधः ॥ १३ ॥ कण्ठं श्री सुविधी रक्षेद्, हृदयं श्रीसुशीतलः। श्रेयांसो बाहुयुगलं, वासुपूज्यः करद्वयम् ।१४। अंगुलीर्विमलो रक्षे, – दनन्तोऽसौ स्तनावपि । श्रीधर्मोऽप्युदरास्थीनि, श्रीशान्तिर्नाभिमण्डलम् ॥ १५ ॥ श्रीकुन्थुर्गुह्यकं रक्षे,-दरो रोमकटीतटम् । मल्लिरुरुपृष्ठवंशं, जंघे च मुनिसुव्रतः ।१६। पादांगुलीर्नमी रक्षेद्, श्रीनेमिश्चरणद्वयम् । श्रीपार्श्वनाथः सर्वांगं, वर्द्धमानश्चिदात्मकम् ।१७। पृथिवीजलतेजस्क-वाय्वाकाशमयं जगत्। रक्षेदशेषपापेभ्यो, वीतरागो निरञ्जनः ॥ १८ राजद्वारे श्मशाने च, संग्रामे शत्रुसंकटे । व्याघ्रचोराग्निसर्पादि-भूतप्रेतभयाश्रिते ॥ १६ ॥ अकाले मरणे प्राप्ते, दारिद्र्यापत्समाश्रिते । अपुत्रत्वे महादोषे, मूर्खत्वे रोगपीडिते ॥ २० ॥ डाकिनी शाकिनी, ग्रस्ते, महाग्रहगणार्दिते । नद्युत्तारेऽध्ववैषम्ये, व्यसने चापदि स्मरेत् ॥ २१ ॥ प्रातरेव समुत्थाय, यः स्मरेज्जिनपञ्जरम् । तस्य किञ्चिद्भयं नास्ति, लभते सुखसम्पदः ॥२२॥ जिनपञ्जरनामेदं, यः स्मरेदनुवासरम् । कमलप्रभराजेन्द्रः, श्रियं स लभते नरः ॥ २३ ॥ प्रातः समुत्थाय पठेत् कृतज्ञो, यः स्तोत्रमेतज्जिनपञ्जराख्यम् । आसादयेत् सकमलप्रभाख्यो, लक्ष्मीं मनोवाञ्छितपूरणाय ॥ २४ ॥ श्रीरुद्रपल्लीयवरेण्यगच्छे, देवप्रभाचार्यपदाब्जहंसः । वादीन्द्रचूडामणिरेष जैनो, जीयाद्गुरुः श्रीकमलप्रभाख्यः ॥२५॥ इति ॥

श्रीऋषिमण्डल-स्तोत्रम् ।

आद्यन्ताक्षरसंलक्ष्य - मक्षरं व्याप्य यत् स्थितम् । अग्नि-ज्वालासमं नाद-बिन्दुरेखासमन्वितम् ॥ १ ॥ अग्निज्वाला-समाक्रातं, मनोमलविशोधकम् । देदीप्यमानं हृत्पद्मे, तत्पदं नौमि निर्मलम् ॥ २ ॥ अर्हमित्यक्षरं ब्रह्म-वाचकं परमेष्ठिनः । सिद्धचक्रस्य सद्बीजं, सर्वतः प्रणिदध्महे ॥ ३ ॥ ॐ नमोऽर्हद्भ्य ईशेभ्य, ॐ सिद्धेभ्यो नमो नमः । ॐ नमः सर्वसूरिभ्य, उपाध्यायेभ्य ॐ नमः ॥ ४ ॥ ॐ नमः सर्वसाधुभ्य, ॐ ज्ञानेभ्यो नमो नमः । ॐ नमस्तत्त्वदृष्टिभ्य-श्चारित्रेभ्यस्तु ॐ नमः ॥ ५ ॥ श्रेयसेऽस्तु श्रियेऽस्त्वेत - दर्हदाद्यष्टकं शुभम् । स्थानेष्वष्टसु विन्यस्तं, पृथग् बीजसमन्वितम् ॥ ६ ॥ आद्यं पदं शिखां रक्षेत्, परं रक्षेत्तु मस्तकम् । तृतीयं रक्षेन्नेत्रे द्वे, तुर्यं रक्षेच्च नासिकाम् ॥ ७ ॥ पञ्चमं तु मुखं रक्षेत्, षष्ठं रक्षेच्च घण्टिकाम् । नाभ्यन्तं सप्तमं रक्षेद्, पादान्तमष्टमस्मृतम् ॥ ८ ॥ पूर्वंप्रणवतः सान्तः, सरेफो व्यब्धिपञ्चपान् । सप्ताष्टदशसूर्याङ्कान्, श्रितो बिन्दुस्वरान् पृथक् ॥ ९ ॥ पूज्यनामाक्षरा आद्याः, पंचैते ज्ञान-दर्शने । चारित्रेभ्यो नमो मध्ये, ह्रीं सान्तःसमलंकृतः ॥ १० ॥ ॐ ह्रां ह्रीं ह्रुं ह्रूं ह्रें ह्रैं ह्रौं ह्रः अ सि आ उ सा ज्ञानदर्शन-चारित्रेभ्यो ह्रीं नमः । जम्बूवृक्षधरो द्वीपः, क्षारोदधिसमावृतः । अर्हदाद्यष्टकैरष्टकाष्ठाधिष्ठैरलंकृतः ॥ ११ ॥ तन्मध्ये सङ्गतो मेरुः, कुटलक्षैरलंकृतः । उच्चैरुच्चैस्तरस्तार - स्तारामण्डल-मण्डितः ॥ १२ ॥ तस्योपरिसकारान्तं, बीजमध्यास्य सर्वगम् ।

नमामि बिम्बमार्हन्त्यं, ललाटस्थं निरञ्जनम् ॥ १३ ॥ अक्षयं निर्मलं शान्तं, बहुलं जाड्यतोज्झितम् । निरीहं निरहङ्कारं, सारं सारतरं घनम् ॥ १४ ॥ अनुद्धतं शुभं स्फीतं, सात्त्विकं राजसं मतम् । तामसं चिरसम्बुद्धं, तैजसं शर्वरीसमम् ॥ १५ ॥ साकारं च निराकारं, सरसं विरसं परम् । परापरं परातीतं, परम्परपरापरम् ॥ १६ ॥ एकवर्णं द्विवर्णं च, त्रिवर्णं तुर्यवर्णकम् । पञ्चवर्णं महावर्णं, सपरं च परापरम् ॥ १७ ॥ सकलं निष्कलं तुष्टं, निर्वृतं भ्रान्तिवर्जितम् । निरञ्जनं निराकारं, निर्लेपं वीतसंश्रयम् ॥ १८ ॥ ईश्वरं ब्रह्मसम्बुद्धं, बुद्धं सिद्धं मतं गुरुम् । ज्योतीरूपं महादेवं, लोकालोकप्रकाशकम् ॥ १९ ॥ अर्हदाख्यस्तु वर्णान्तः, सरेफो बिन्दुमण्डितः । तुर्यस्वरसमायुक्तो, बहुधा नादमालितः ॥ २० ॥ अस्मिन् बीजे स्थिताः सर्वे, ऋषभाद्या जिनोत्तमाः । वर्णैर्निजैर्निजैर्युक्ता, ध्यातव्यास्तत्र सङ्गताः ॥ २१ ॥ नादश्चन्द्रसमाकारो, बिन्दुर्नीलसमप्रभः । कलारुणसमासान्तः, स्वर्णाभः सर्वतोमुखः ॥ २२ ॥ शिरःसंलीन ईकारो, विनीलो वर्णतः स्मृतः । वर्णानुसारसंलीनं, तीर्थकृन्मण्डलं स्तुमः ॥ २३ ॥ चन्द्रप्रभपुष्पदन्तौ, नादस्थितिसमाश्रितौ । बिन्दुमध्यगतौ नेमि-सुव्रतौ जिनसत्तमौ ॥ २४ ॥ पद्मप्रभवासुपूज्यौ, कलापदमधिष्ठितौ । शिरईस्थितसंलीनौ, पार्श्वमल्ली जिनोत्तमौ ॥ २५ ॥ शेषास्तीर्थंकराः सर्वे, हरस्थाने नियोजिताः । मायाबीजाक्षरं प्राप्ताश्चतुर्विंशतिरर्हताम् ॥ २६ ॥

गतरागद्वेषमोहाः, सर्वपापविवर्जिताः। सर्वदा सर्वकालेषु, ते भवन्तु जिनोत्तमाः ॥ २७ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिनस्तु डाकिनी ॥ २८ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिनस्तु राकिनी ॥ २९ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिनस्तु लाकिनी ॥ ३० ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिनस्तु काकिनी ॥३१॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिनस्तु शाकिनी ॥३२॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिनस्तु हाकिनी ॥ ३३ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिंनस्तु याकिनी ॥ ३४ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिंसन्तु पन्नगाः ॥ ३५ ॥ देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिंसन्तु हस्तिनः ॥ ३६ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिंसन्तु राक्षसाः ॥ ३७ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिंसन्तु वह्नयः ॥ ३८ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं, मा मां हिंसन्तु सिंहकाः ॥ ३९ ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा। तयाच्छादितसर्वांगं,

मा मां हिंसन्तु दुर्जनाः ॥ ४० ॥ देवदेवस्य यच्चक्रं, तस्य चक्रस्य या विभा । तयाच्छादितसर्वांगं, मा मां हिंसन्तु भूमिपाः ॥ ४१ ॥ श्रीगौतमस्य या मुद्रा, तस्या या भुवि लब्धयः । ताभिरभ्युद्यतज्योति रर्हं सर्वनिधीश्वरः ॥ ४२ ॥ पातालवासिनो देवा, देवा भूपीठ-वासिनः । स्वर्वासिनोऽपि ये देवाः, सर्वे रक्षन्तु मामितः ॥ ४३ ॥ येऽवधिलब्धयो ये तु, परमावधिलब्धयः । ते सर्वे मुनयो देवाः, मां संरक्षन्तु सर्वदा ॥४४॥ दुर्जना भूतवेतालाः, पिशाचा मुद्गलास्तथा । ते सर्वेऽप्युपशाम्यन्तु, देवदेवप्रभावतः ॥ ४५ ॥ ॐ ह्रीं श्रीश्च धृतिर्लक्ष्मी-गौरी चण्डी सरस्वती । जयाम्बा विजया नित्या क्लिन्नाऽजिता मदद्रवा ॥४६॥ कामाङ्गा कामबाणा च, सानन्दा नन्दमालिनी । माया मायाविनी रौद्री, कला काली कलिप्रिया ॥ ४७ ॥ एताः सर्वा महादेव्यो, वर्तन्ते या जगत्त्रये । मह्यं सर्वाः प्रयच्छन्तु, कान्तिं कीर्तिं धृतिं मतिम् ॥ ४८ ॥ दिव्यो गोप्यः सुदुष्प्राप्यः, श्रीऋषिमण्डलस्तवः । भाषितस्तीर्थनाथेन, जगत्त्राण-कृतोऽनघः ॥ ४९ ॥ रणे राजकुले वह्नौ, जले दुर्गे गजे हरौ । श्मशाने विपिने घोरे, स्मृतो रक्षति मानवम् ॥ ५० ॥ राज्य-भ्रष्टा निजं राज्यं, पदभ्रष्टा निजं पदम् लक्ष्मीभ्रष्टा निजां लक्ष्मीं, प्राप्नुवन्ति न संशयः ॥ ५१ ॥ भार्यार्थी लभते भार्यां, पुत्रार्थी लभते सुतम् । वित्तार्थी लभते वित्तं, नरः स्मरणमात्रतः ॥ ५२ ॥ स्वर्णे रूप्ये पटे कांस्ये, लिखित्वा यस्तु पूजयेत् । तस्यै-वाष्टमहासिद्धि-र्गृहे वसति शाश्वती ॥ ५३ ॥ भूर्जपत्रे लिखि-

त्वेदं, गलके मूर्ध्नि वा भुजे । धारितं सर्वदा दिव्यं, सर्वभीति-विनाशकम् ॥ ५४ ॥ भूतैः प्रेतैर्ग्रहैर्यक्षैः, पिशाचैर्मुद्गलैर्मलैः । वातपित्तकफोद्रेकैर्मुच्यते नात्र संशयः ॥ ५५ ॥ भूर्भुवःस्वस्त्रयीपीठवर्त्तिनः शाश्वता जिनाः । तैः स्तुतैर्वन्दितैर्दृष्टैर्यत्फलं तत्फलं श्रुतौ ॥ ५६ ॥ एतद्गोप्यं महास्तोत्रं, न देयं यस्य कस्यचित् । मिथ्यात्ववादिने दत्ते, बालहत्या पदे पदे ॥ ५७ ॥ आचाम्लादि तपः कृत्वा, पूजयित्वा जिनावलीम् । अष्टसाहस्रिको जापः, पूजयित्वा जिनावलीम् । अष्टसाहस्रिको जापः, कार्यस्तत्सिद्धिहेतवे ॥ ५८ ॥ शतमष्टोत्तरं प्रातर्ये पठन्ति दिने दिने । तेषां न व्याधयो देहे, प्रभवन्ति न चापदः ॥ ५९ ॥ अष्टमासावधिं यावत्, प्रातः प्रातस्तु यः पठेत् । स्तोत्रमेतद् महातेजो, जिनबिम्बं स पश्यति ॥ ६० ॥ दृष्टे सत्यर्हतो बिम्बे, भवे सप्तमके ध्रुवम् । पदं प्राप्नोति शुद्धात्मा, परमानन्दनन्दितः ॥६१॥ विश्ववन्द्यो भवेद् ध्याता, कल्याणानि च सोऽश्नुते । गतः स्थानं परं सोऽपि, भूयस्तु न निवर्त्तते ॥ ६२ ॥ इदं स्तोत्रं महास्तोत्रं स्तुतीनामुत्तमं परम् । पठनात स्मरणाज्जापाल्लभ्यते पदमुत्तमम् ॥ ६३ ॥ इति ॥

तिजयपहुत्त - नामकस्तोत्रम् ।

तिजय - पहुत्त - पयासय, अट्ठ - महापाडिहेरजुत्ताणं । समयक्खित्तठिआणं, सरेमि चक्कं जिणिंदाणं ॥ १ ॥ पणवीसा य

